श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा –शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम्–७ | गुणाः – ७० |
|---|---|---|
| विषयः – ज्यौतिषशास्त्रम् | (C.C.- 1.1.1. New ) | समयः ११:३० तः २:३० |
| दिनाङ्कः – १६/१०/२०१९ | सन्दर्भग्रन्थः – मुहूर्तचिन्तामणिः | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं ससन्दर्भं व्याख्यां कुरुत । १०**

(अ) षष्ठ्यष्टमीभूतविधुक्षयेषु नो सेवेत ना तैलपले क्षुरंतम् ॥
नाभ्यञ्जनं विश्वदशद्विके तिथौ धात्रीफलैः स्नानममाद्रिगोष्वसत् ॥

(ब) रेवापूर्वे गण्डकीपश्चिमे च शोणस्योदग्दक्षिणे नीच इज्यः ।
वर्ज्यो नायं कौङ्कणे मागधे च गौड़े सिंधौ वर्जनीयः शुभेषु ॥

(क) वारे प्रोक्तं कालहोरासु तस्य धिष्ण्येप्रोक्तं स्वामितिथ्यंशकेऽस्य ।
कुर्याद्दिक्छूलादिचिन्त्यं क्षणेषु नैवोल्लंघ्यः पारिघश्चापि दण्डः ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) चैत्रादिमासेषु शून्यतिथयः ।

(ब) कालहोराप्रयोजनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं ससन्दर्भं व्याख्यां कुरुत । १०**

(अ) स्वात्यादित्यमृदुद्विदैवगुरुभे कर्णत्रयाश्वे चरे
लग्ने धर्म्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगः शुभः ॥
नारे ग्राह्यमृणन्तु संक्रमदिने वृद्धौ करऽर्केऽह्नि यत् ।
तद्वंशेषु भवेदृणं न च वुधे देयं कदाचिद् धनम् ॥

(ब) सैकातिथिर्वारयुता कृताप्ता शेषे गुणेऽभ्रे भुविवह्निवासः ।
सौख्याय होमे शशियुग्मशेषे प्राणार्थनाशौ दिवि भूतले च ॥

(क) क्षिप्राहिमूलेन्दुहरीशवायुभे प्रेतक्रिया स्याज्झषकुम्भगे विधौ ।
प्रेतस्य दाहं यम दिग्गमं त्यजेत् शय्यावितानं गृहगोपनादि च ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(अ) नक्षत्रस्वरूपम् ।

(ब) नूतनवस्त्रदग्धविचारः ।

## तृतीयान्विति:

**प्रश्न: ५ अधोलिखितेभ्य: कयोश्चित् द्वयो: सान्वयं ससन्दर्भं व्याख्यां कुरुत । १०**

(अ) धार्यं लाजावर्तकं राहुकेत्वो रौप्यं शक्रेन्द्वोश्च मुक्ता गुरोस्तु ।
लोहं मंदस्यारभान्वो: प्रवालं तारा जन्मर्क्षात्त्रिरावृत्तित: स्यात् ॥

(ब) केषान्तं षोडशे वर्षे चौलोक्तदिवसे शुभम् ।
व्रतोक्तदिवसादौ हि समावर्तनमिष्यते ॥

(क) कवीज्यचन्द्रलग्नपा रिपौ मृतौव्रतेऽधमा: ।
व्ययेऽब्जभार्गवौ तथा तनौ मृतौ सुते खला: ॥

**प्रश्न: ६ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(अ) विद्यारम्भमुहूर्त: । (ब) चूडाकर्म-मुण्डनमुहूर्त: ।

## संयुक्तान्विति:

**प्रश्न: ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) मुहूर्तचिन्तामणिग्रन्थस्य प्रथमप्रकरणस्य नाम किम् ?

(२) होरानामकसंक्रान्ति: कदा भवति ?

(३) घोरासंक्रान्तिफलं किम् ?

(४) मृगशिरानक्षत्रस्याकृति: कथं भवति ?

(५) प्रतिपदातिथे: स्वामिन: क: ?

(६) सितशब्दस्यार्थ: क: ?

(७) पूर्णातिथि: का ?

(८) गुरौ पूर्णासिद्धियोगकारकं भवति वा न ?

(९) जन्मनक्षत्रजन्ममासजन्मलग्नजन्मतिथिजन्मदिनेषु यदा ब्राह्मणबालकस्य उपनयनसंस्कार: भवति तदा फलं किम् ?

(१०) उपनयनसंस्कारकाले यदि सूर्यादिग्रहकेन्द्रे भवति चेत् फलं किम् ?

(११) ऋग्वेदस्य स्वामिग्रह: क: ?

(१२) बालकस्य कदा मुण्डनं न कर्तव्यम् ?

(१३) शुक्र: पूर्वदिशायामुदयति चेत् कति दिवसपर्यन्तं बालत्वं भवति ?

(१४) पञ्चमासाधिके मातुर्गर्भे चौलं शुभाशुभं वा ?

(१५) मुहूर्तचिन्तामणिग्रन्थस्य लेखक: क: ?

----oooo----